## १८. शिवस्तुतिः

स्पुटं स्फटिकसप्रभं स्फुटितहाटकश्रीजटं
शशांकदलशेखरं कपिलफुल्लनेत्रत्रयम्।
तरक्षुवरकृत्तिमद्भुजगभूषणं भूतिमत्
कदानु शितिकंठ ते वपुरवेक्षते वीक्षणम्॥ १॥

त्रिलोचन विलोचने लसति ते ललामायिते
स्मरो नियमघस्मरो नियमिनामभूद्भस्मसात्।
स्वभक्तिलतया वशीकृतवती सतीयं सती
स्वभक्तवशतो भवानपि वशी प्रसीद प्रभो॥ २॥

महेश महितोऽसि तत्पुरुषपूरुषाग्र्यो भवा-
नघोर रिपुघोर तेऽनवम वामदेवांजलि:।
नम: सपदिजात ते त्वमिति पंचरूपोऽंचित:
प्रपंचय च पंचवृन्मम मनस्तमस्ताडय॥ ३॥

रसाघनरसानलानिलवियद्विवस्वद्विधु-
प्रयष्टृषु निविष्टमित्यज भजामि मूर्त्यष्टकम्।
प्रशांतमुत भीषणं भुवनमोहनं चेत्यहो
वपूंषि गुणपुंषि तेऽहमहमात्मनोऽहंभिदे॥ ४॥

विमुक्तिपरमाध्वनां तव षडध्वनामास्पदं
पदं निगमवेदिनो जगति वामदेवादय:।
कथंचिदुपशिक्षिता भगवतैव संविद्रते
वयं तु विरलांतरा: कथमुमेश तन्मन्महे॥ ५॥

कठोरितकुठारया ललितशूलया बाहया
रणड्डुमरया स्फुरद्धरिणया सखट्वांगया।
चलाभिरचलाभिरप्यगणिताभिरुन्नृत्यत-
श्चतुर्दश जगंति ते जय जयेत्यगुर्विस्मयम्॥ ६॥

पुरत्रिपुररंधनं विविधदैत्यविध्वंसनं
पराक्रमपरंपरा अपि परा नते विस्मय:।
अमर्षबलहर्षितक्षुभितवृत्तनेत्रोज्ज्वल-
ज्ज्वलनहेलया शलभितं हि लोकत्रयं॥ ७॥

सहस्रनयनो गुहः सहसहस्ररश्मिर्विधु-
र्बृहस्पतिरुताप्पतिः ससुरसिद्धविद्याधराः।
भवत्पदपरायणाः श्रियमिमामगुः प्रार्थिनां
भवान् सुरतरुर्दृशं दिश शिवां शिवावल्लभ॥८॥

तव प्रियतमाददिप्रियतमं सदैवांतरं
पयस्युपहितं घृतं स्वयमिव श्रियो वल्लभम्।
विभिद्य लघुबुद्धयः स्वपरपक्षलक्ष्यायितं
पठंति हि लुठंति ते शठहृदः शुचा शुंठिताः॥९॥

निवासनिलयश्चिता तव शिरस्ततिर्मालिका
कपालमपि ते करे त्वमशिवोऽस्यनंतर्धियाम्।
तथाऽपि  भवतः पदं शिवशिवेत्यदो जल्पता-
मकिंचन न किंचन वृजिनमस्त्यभस्मीभवत्॥१०॥

त्वमेव किल कामधक् सकलकाममापूरयन्
सदा त्रिनयनो भवान्वहसि चात्रिनेत्रोद्भवम्।
विषं विषधरान् दधत्पिबसि तेन चाऽंनंदवान्
विरुद्धचरितोचिता जगदधीशते भिक्षुता॥११॥
नमः शिव शिवाशिवाशिव शिवार्ध कृंताशिवं
नमो हरहराहराहरहरांतरीं मे दृशम्।
नमो भव भवाभव प्रभव भूतये संपदां
नमो मृड नमोनमो नम उमेश तुभ्यं नमः॥१२॥

सतां श्रवणपद्धतिं सरतु सन्नतोक्तेत्यसौ
शिवस्य करुणांकुरात्प्रतिकृतात्सदा सोदिता।
इति प्रथितमानसो व्यधित नाम नारायणः
शिवस्तुतिमिमां शिवां लिकुचसूरिसूनुः सुधीः॥१३॥

॥इति श्रीकविकुलतिलकश्रीमत्त्रिविक्रमपंडिताचार्यसुतश्रीमन्नारयणपंडिताचार्यविरचिता
शिवस्तुतिःसमाप्ता॥